हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय
**Central University of Himachal Pradesh**
धौलाधार परिसर I -, धर्मशाला, जिला कांगड़ा -, हिमाचल प्रदेश –17621
Dhauladhar Campus - I, Dharamshala, District Kangra (HP)-176215
Website: http://www.cuhimachal.ac.in

आज़ादी का अमृत महोत्सव

## संस्कृत-पालि-प्राकृतविभागस्य पाठ्यसमितेः (BoS-9) नवमोपवेशनस्य कार्यवृत्तम्

संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः नवमोपवेशनं हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य धर्मशालास्थिते धौलाधारपरिसर-1 इत्यत्र 27 सितम्बर, 2021 दिनाङ्के पूर्वाह्ने 11:00 वादने अभूत् । गोष्ठीसमारम्भः पाठ्यसमितेः अध्यक्षस्य संयोजकस्य च डॉ.बृहस्पतिमिश्रस्य वैदिक-मङ्गलाचरणेन औपचारिकस्वागतभाषणेन च अभवत् ।

अस्मिन् उपस्थिताः सदस्याः आसन् –

1.डॉ. बृहस्पतिमिश्रः ,विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः , अधिष्ठाता, भाषासंकायः
(अध्यक्षः संयोजकश्च, पाठ्यसमितिः)
2. प्रो. हर्षमेहता, सेवानिवृत्त आचार्यः - पंजाबविश्वविद्यालयः, (तलवाड़ा, होशियारपुरम् (बाह्यविशेषज्ञः)
3. डॉ० ओम्दत्तः सरोचः , सेवानिवृत्तः प्राचार्यः, संस्कृतमहाविद्यालयः , चकमोहः , हमीरपुरम् ( बाह्यविशेषज्ञः)
4. प्रो० रोशनलालशर्मा, आचार्यः,आङ्ग्लविभागः (कुलपतिद्वारानामितः सदस्यः)
5. प्रो. ओ.एस.के.शास्त्री, आचार्यः,भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारानामितः सदस्यः)
6. डॉ. कुलदीपकुमारः , सहायक आचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः सदस्यः )

अस्मिन् उपवेशने विभागाध्यक्षः एतां कार्यसूचीं समुपस्थापितवान्-

- 9.1 15 सितम्बर, 2021 दिनाङ्के जातस्य पाठ्यसमितेः अष्टमस्य उपवेशनस्य कार्यवृत्तस्य अनुमोदनम् ।
- 9.2 राष्ट्रिय-शिक्षानीतिः -2020 इत्यस्य अनुपालनाय विश्वविद्यालयस्य दिशानिर्देशानां सैद्धान्तिकानुमोदनम् ।
- 9.3 स्नातकप्रथमसत्रस्य पाठ्यक्रमस्य (रा.शि.नी.-2020 अनुसारम्) अनुमोदनम् ।
- 9.4 स्नातकोत्तरप्रथमसत्रस्य पाठ्यक्रमस्य (रा.शि.नी.-2020 अनुसारम्) अनुमोदनम् ।
- 9.5 स्नातकसंस्कृतस्य उपाधिपत्रे शास्त्रीति शब्द योजनस्य निर्णयः ।
- 9.6 राष्ट्रिय-शिक्षानीतिः -2020 इत्यस्य अनुपालनाय स्नातकस्तरे आङ्ग्लपाठ्यक्रमस्य अङ्गीकरणम् ।
- 9.7 संस्कृतसम्भाषणस्य प्रमाणपत्रीयपाठ्यक्रमस्य निर्णयः ।

- 9.8 परीक्षकसूच्याः अनुमोदनम्।
- 9.9 अध्यक्षस्य अनुमत्या उपस्थापनीयः कोपि विषयः यः कार्यसूच्यां पूर्वनिर्धारितः नास्ति पाठ्यसमितेश्च अधिकारक्षेत्रे पतति ।

**कार्यविवरणम् इत्थम् अस्ति-**

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.1**

- 15 सितम्बर, 2021 दिनाङ्के जातस्य पाठ्यसमितेः अष्टमस्य उपवेशनस्य कार्यवृत्तस्य अनुमोदनम् (संलग्नकः -1 )

**कार्यविवरणम्-**

संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः अष्टमस्य उपवेशनस्य कार्यवृत्तं डॉ. कुलदीपकुमारः सहायक आचार्यः संस्कृतपालिप्राकृतविभागस्य प्रस्तुतवान् यस्य अनुमोदनं समितिसदस्यैः विचारविमर्शानन्तरं कृतम्।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.2**

- राष्ट्रिय-शिक्षानीतिः -2020 इत्यस्य अनुपालनाय विश्वविद्यालयस्य दिशानिर्देशानां सैद्धान्तिकानुमोदनम् । (संलग्नक-2)

**कार्यविवरणम्-**

राष्ट्रिय-शिक्षानीतिः -2020 इत्यस्य अनुपालनाय विश्वविद्यालयस्य दिशानिर्देशानां गहनविचारणानन्तरं सैद्धान्तिकानुमोदनं कृतम् ।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.3**

- स्नातकप्रथमसत्रस्य पाठ्यक्रमस्य (रा.शि.नी.-2020 अनुसारम्) अनुमोदनम् (संलग्नक -3 )

**कार्यविवरणम्-**

समितिसदस्यैः गहनविचारानन्तरं स्नातकप्रथमसत्रस्य पाठ्यक्रमस्य (रा.शि.नी.-2020 अनुसारम्) अनुमोदनं कृतम् ।अनेनैव साकं अस्मिन् विषये समितिसदस्येन प्रो. ओ.एस.के. शास्त्रिणा परामर्शः प्रदत्तः यत् स्नातकस्य त्रिषु वर्षेषु राष्ट्रिय-शिक्षानीतेः अनुसारेण प्रथमचतुर्षु सत्रेषु गौणविभागे (Minor) चतुर्णां श्रेयाङ्कानां (Credits) चतुर्णां प्रश्नपत्रानां सामुदायिकसम्पर्कस्य अन्तर्गतं च द्वयोः श्रेयाङ्कयोः (Credits) चतुर्णां प्रश्नपत्रानां पठनेन छात्रः आहत्य 24 श्रेयाङ्कानां (Credits) समर्जनं विधास्यति । यस्मिन् विषये छात्रः 24 श्रेयाङ्कानां (Credits) समर्जनं विधास्यति तस्मिन् विषये सः स्नातकोत्तरम् उपाधिम् अर्जितं कर्तुमर्हः भविष्यति । एवं कृते सति संस्कृतच्छात्राय स्नातकोत्तीर्णतायाः अनन्तरम् अन्यविषयेषु यथा हिन्द्यां, समाजशास्त्रे , पंजाबीभाषायां , राजनीतिविज्ञाने इत्यादिष्वपि स्नातकोत्तरं कर्तुम् अवसरः प्राप्तः स्यादिति सम्भाव्यते ।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.4**

- स्नातकोत्तरप्रथमसत्रस्य पाठ्यक्रमस्य (रा.शि.नी.-2020 अनुसारम्) अनुमोदनम् । (संलग्नक -4 )

**कार्यविवरणम्-**

समितेः सर्वैः सदस्यैः गहनविचारानन्तरं प्रस्तावितस्य स्नातकोत्तरप्रथमसत्रस्य पाठ्यक्रमस्य (रा.शि.नी.-2020 अनुसारम्) अनुमोदनं कृतम्।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.5**

- स्नातकसंस्कृतस्य उपाधिपत्रे शास्त्रीतिशब्दयोजनस्य निर्णयः।

**कार्यविवरणम्-**

स्नातकसंस्कृतस्य उपाधिपत्रे शास्त्रीतिशब्दयोजनस्य निर्णयाय समितेः सर्वैः सदस्यैः गहनो विचारविमर्शः कृतः। सर्वेषु पक्षेषु विचार्य समित्या इदं निष्कृष्टं यत् स्नातकस्य वर्तमानस्वरूपे स्नातकोपाधिना सह "शास्त्री" इति शब्दस्य योजनं समीचीनं न भविष्यति । सर्वेषां सदस्यानां विषयेस्मिन् ऐकमत्यम् आसीत् यत् विश्वविद्यालयस्य संस्कृतविभागे वर्तमानकाले प्रवर्तमानस्य स्नातकसंस्कृतस्य उपाधिना साकं पृथक्तया "शास्त्री" इति उपाधेः कार्यक्रमः संचालयितुं शक्यते ।

एवं समानान्तररूपेण स्नातकसंस्कृतस्य (B.A.) एवं शास्त्रीति उपाधेश्च कार्य क्रम द्वयस्य संचालनेन छात्राणां हितमपि भविष्यति यथेच्छं विकल्पचयनस्य स्वतन्त्रतापि प्राप्ता भविष्यति । विषयेस्मिन् समित्या सर्वसम्मतिः व्यक्तीकृता ।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.6**

- राष्ट्रिय-शिक्षानीतिः -2020 इत्यस्य अनुपालनाय स्नातकस्तरे आङ्ग्लपाठ्यक्रमस्य अङ्गीकरणम्(संलग्नक -5 )

**कार्यविवरणम्-**

समितेः सर्वैः सदस्यैः गहनविचारानन्तरं राष्ट्रिय-शिक्षानीतिः -2020 इत्यस्य अनुपालनाय स्नातकस्तरे आङ्ग्लपाठ्यक्रमस्य अङ्गीकरणं कृतम्।अयं विषय आङ्ग्लविभागद्वारा एव पाठयिष्यते ।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.7**

- संस्कृतसम्भाषणस्य प्रमाणपत्रीयपाठ्यक्रमस्य निर्णयः।

**कार्यविवरणम्-**

संस्कृतसम्भाषणस्य प्रमाणपत्रीय-पाठ्यक्रमस्य विषये सर्वैः समितिसदस्यैः विभिन्नपक्षेषु चिरं विचार्य अन्ते मे इदं निष्कृष्टं यत् अस्य निर्णयः इदानीं पाठ्यसमितेः उपवेशने कर्तुं न शक्यते। एतदर्थं एका पाठ्यक्रम-विकास-समितिः निर्मातव्या । अस्याः समितेः प्रतिवेदने पश्चात् पाठ्यसमितौ विचारयितुं शक्यते । आचार्येण ओ.एस.के. शास्त्रिणा परामर्शः प्रदत्तः यत् पाठ्यक्रमस्य अवधेः अनुसारमेव नामकरणं स्यात् येन भाविनि काले नामसमानतया कोपि भ्रमः अथवा विसंगतिः उत्पन्ना न स्यात्।

समितिगतैः अन्यैः सर्वैः सदस्यैः विषयेस्मिन् स्वीया सहमतिः प्रकाशिता।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.8**

- परीक्षकसूच्याः अनुमोदनम्। (संलग्नक -6 )

**कार्यविवरणम्-**

पाठ्यसमितेः सर्वैः सदस्यैः मूल्याङ्कनहेतवे विभागाध्यक्षद्वारा उपस्थापिता परीक्षकसूची अनुमोदिता ।

**विषयक्र. : एस.के.टी./बी.ओ.एस/9.9**

अध्यक्षस्य अनुमत्या उपस्थापनीयः कोपि विषयः यः कार्यसूच्यां पूर्वनिर्धारितः नास्ति पाठ्यसमितेश्च अधिकारक्षेत्रे पतति ।

**कार्यविवरणम्-**

कोपि विषयो न प्रस्तुतः ।

अन्ते अध्यक्षद्वारा बाह्यविषयविशेषज्ञानां , कुलपतिद्वारानामितसदस्यानां विभागीयसदस्यानां च आभारः प्रकटितः। अनेन आभारप्रदर्शनेन साकमेव संस्कृतपालीप्राकृतविभागस्य पाठ्यसमितेः नवमम् उपवेशनं संपन्नमभूत्।

1. डॉ. बृहस्पतिमिश्रः (अध्यक्षः संयोजकश्च , पाठ्यसमितिः) 27-9-2021
2. प्रो. हर्षमेहता (बाह्यविशेषज्ञः) (online - उपस्थित)
3. डॉ० ओम्दत्तः सरोचः ( बाह्यविशेषज्ञः) (आभासीय रूपेण उपस्थित - online)
4. प्रो० रोशनलालशर्मा (कुलपतिद्वारानामितः सदस्यः) 27/9/2021
5. प्रो. ओ.एस.के.शास्त्री (कुलपतिद्वारानामितः सदस्यः)
6. डॉ. कुलदीपकुमारः (विभागीयः सदस्यः ) 27/09/2021

**<u>हिंदी मे अनुवाद</u>**

**<u>संस्कृत, पालि एवं प्राकृत विभाग की नवमी पाठ्य समिति (BoS-9) का कार्यवृत्त</u>**

संस्कृत, पालि एवं प्राकृत विभाग की नवमी पाठ्य समिति (BoS-9) की बैठक हिमाचल प्रदेश केंद्रीय विश्वविद्यालय के धर्मशाला स्थित धौलाधार परिसर-1 में 27 सितम्बर, 2021 को पूर्वाह्न 11:00 पर हुई। गोष्ठी का आरंभ पाठ्य समिति के अध्यक्ष एवं संयोजक डॉ. बृहस्पति मिश्र के वैदिक मंगलाचरण और औपचारिक स्वागत भाषण से हुआ।

इस बैठक में उपस्थित सदस्य थे –

1. डॉ. बृहस्पति मिश्र, विभागाध्यक्ष- संस्कृत पालि एवं प्राकृत विभाग, अधिष्ठाता, भाषा स्कूल (अध्यक्ष एवं संयोजक, पाठ्य समिति)
2. प्रो. हर्ष मेहता, सेवानिवृत्त , आचार्य - पंजाब विश्वविद्यालय (तलवाड़ा टाउनशिप होशियारपुर (बाह्यविशेषज्ञ )
3. डॉ० ओम दत्त सरोच, सेवानिवृत्त प्राचार्य- संस्कृत महाविद्यालय, चकमोह , हमीरपुर ( बाह्यविशेषज्ञ)
4. प्रो० रोशन लाल शर्मा, आचार्य – अंग्रेजी विभाग (कुलपतिद्वारा नामित सदस्यः)
5. प्रो. ओ.एस.के.शास्त्री, आचार्य – भौतिकी एवं खगोल विज्ञान विभाग (कुलपतिद्वारा नामितः सदस्यः)
6. डॉ. कुलदीप कुमार , सहायक आचार्य- संस्कृत पालि एवं प्राकृत विभाग (विभागीय सदस्य:)

**इस बैठक के लिए** विभागाध्यक्ष **ने इस कार्य सूची का उपस्थापन किया-**

- 9.1 15 सितम्बर, 2021 को आठवीं पाठ्य समिति (BoS-8) की वैठक के कार्यवृत्त का अनुमोदन हेतु।
- 9.2 राष्ट्रीय शिक्षा नीति-2020 की अनुपालना हेतु विश्वविद्यालय के दिशानिर्देशों के सैद्धान्तिक अनुमोदन हेतु।
- 9.3 स्नातक प्रथम सत्र के पाठ्यक्रम (रा.शि.नी.-2020) के अनुमोदन हेतु।
- 9.4 स्नातकोत्तर प्रथम सत्र के पाठ्यक्रम (रा.शि.नी.-2020)के अनुमोदन हेतु।
- 9.5 स्नातक संस्कृत की उपाधि मे शास्त्री शब्द जोड़ने के निर्णय हेतु।
- 9.6 राष्ट्रीय शिक्षा नीति-2020 की अनुपालना मे स्नातक स्तर के आंग्ल पाठ्य क्रम के अंगीकरण हेतु।
- 9.7 सम्भाषण प्रमाणपत्रीय पाठ्यक्रम के निर्णय हेतु।
- 9.8 परीक्षक सूची के अनुमोदन हेतु।
- 9.9 अध्यक्ष की अनुमति से उपस्थापनीय कोई भी विषय जो कार्यसूची पूर्व निर्धारित नहीं है और पाठ्य समिति के अधिकार क्षेत्र मे है।

**कार्य विवरण इस प्रकार है-**

**विषयक : एस.के.टी./बी.ओ.एस/9.1**

- 15 सितम्बर, 2021 को आठवीं पाठ्य समिति (BoS-8) की वैठक के कार्यवृत्त का अनुमोदन। (संलग्नक -1 )

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग की आठवीं पाठ्य समिति (BoS-8 ) का कार्यवृत्त डॉ. कुलदीप कुमार, सहायक आचार्य संस्कृत पालि एवं प्राकृत विभाग द्वारा प्रस्तुत किया गया जिसका विचार विमर्श के बाद समिति के सदस्यों द्वारा अनुमोदन किया गया।

**विषयक : एस.के.टी./बी.ओ.एस/9.2**

- राष्ट्रीय शिक्षा नीति-2020 की अनुपालना हेतु विश्वविद्यालय के दिशानिर्देशों का सैद्धान्तिक अनुमोदन।(संलग्नक-2 )

**कार्य विवरण**

राष्ट्रीय शिक्षा नीति-2020 की अनुपालना हेतु विश्वविद्यालय के दिशानिर्देशों पर गहन विचार किया गया और इनका सैद्धान्तिक अनुमोदन कर दिया गया।

**विषयक : एस.के.टी./बी.ओ.एस/9.3**

- स्नातक प्रथम सत्र के पाठ्यक्रम (रा.शि.नी.-2020) के अनुमोदन। (संलग्नक -3 )

**कार्य विवरण**

समिति के सदस्यों ने गहन विचार के बाद स्नातक प्रथम सत्र के पाठ्यक्रम (रा.शि.नी.-2020 के अनुसार ) का अनुमोदन कर दिया।

इस के साथ ही इस विषय में समिति के सदस्य प्रो. ओ.एस.के. शास्त्री ने यह परामर्श दिया कि स्नातक के तीन वर्षो में राष्ट्रीय शिक्षा नीति के अनुसार प्रथम चार सत्रों मे गौण (Minor) विभाग के अंतर्गत चार श्रेयांक (Credits) के चार प्रश्न पत्र और सामुदायिक सम्पर्क के अंतर्गत दो श्रेयांक (Credits) के चार प्रश्न पत्र पढने से छात्र कुल 24 श्रेयांक (Credits) (16+8=24) अर्जित कर लेगा। जिस विषय मे छात्र ये 24 श्रेयांक (Credits) अर्जित करेगा उस विषय मे वह स्नातकोत्तर उपाधि अर्जित करने के लिए अर्ह हो जायेगा। ऐसा करने से संस्कृत के छात्र को स्नातक करने के बाद अन्य विषयों जैसे हिंदी , अंग्रेजी, समाजशास्त्र, पंजाबी, राजनीति विज्ञान आदि मे भी स्नातकोत्तर करने के अवसर प्राप्त होने की सम्भावना है।

**विषयक : एस.के.टी./बी.ओ.एस/9.4**

- स्नातकोत्तर प्रथम सत्र के पाठ्यक्रम (रा.शि.नी.-2020) के अनुसार अनुमोदन। (संलग्नक -4 )

**कार्य विवरण**

समिति के सभी सदस्यों ने गहन विचार के बाद प्रस्तावित स्नातकोत्तर प्रथम सत्र के पाठ्यक्रम (रा.शि.नी.-2020 के अनुसार ) का अनुमोदन कर दिया।

**विषयक : एस.के.टी./बी.ओ.एस/9.5**

- स्नातक संस्कृत की उपाधि मे शास्त्री शब्द जोड़ने के निर्णय हेतु।

**कार्य विवरण**

स्नातक संस्कृत की उपाधि मे "शास्त्री" शब्द जोड़ने के निर्णय हेतु समिति के सभी सदस्यों ने गहन विचार विमर्श किया। सभी पक्षों पर विचार करने के बाद समिति इस निष्कर्ष पर पहुंची कि स्नातक के वर्तमान स्वरूप मे स्नातक उपाधि के साथ "शास्त्री" शब्द जोड़ना समीचीन न होगा। सभी सदस्यों का इस विषय मे एक मत था कि विश्वविद्यालय मे संस्कृत विभाग वर्तमान में चल रही स्नातक संस्कृत की उपाधि के साथ- साथ अलग से "शास्त्री" उपाधि का कार्यक्रम चलाया जा सकता है।

इस प्रकार समानान्तर रूप से स्नातक (B.A) संस्कृत एवं शास्त्री उपाधि के दो कार्यक्रम चलाने से छात्रों का हित भी होगा और उन्हें इच्छा के अनुसार विकल्प चुनने की स्वतन्त्रता भी प्राप्त होगी। इस विषय मे समिति ने सर्वसम्मति व्यक्त की।

**विषयक : एस.के.टी./बी.ओ.एस/9.6**

- राष्ट्रीय शिक्षा नीति-2020 की अनुपालना मे स्नातक स्तर के आंग्ल पाठ्यक्रम का अंगीकरण हेतु । (संलग्नक -5 )

**कार्य विवरण**

समिति के सभी सदस्यों ने विचार विमर्श के बाद राष्ट्रीय शिक्षा नीति-2020 की अनुपालना मे उपस्थापित स्नातक स्तर के आंग्ल पाठ्यक्रम का अंगीकरण किया। यह विषय आंग्ल विभाग के द्वारा ही पढ़ाया जायेगा।

**विषयक : एस.के.टी./बी.ओ.एस/9.7**

- सम्भाषण प्रमाणपत्रीय पाठ्यक्रम निर्णय हेतु।

**कार्य विवरण**

संस्कृत सम्भाषण के लिए प्रमाणपत्रीय पाठ्यक्रम के विषय मे समिति के सभी सदस्यों ने विभिन्न पक्षों पर विचार किया और अंत मे इस निष्कर्ष पर पहुंचे कि इसका निर्णय इस समय पाठ्य समिति मे नहीं किया जा सकता और इस

के लिए अलग से एक पाठ्य क्रम विकास समिति (Curriculum Development Committee ) का निर्माण किया जाना चाहिए। इस समिति के प्रतिवेदन पर बाद मे पाठ्य समिति मे विचार किया जा सकता है। इस विषय मे प्रो. ओ.एस.के. शास्त्री ने यह परामर्श दिया कि पाठ्य क्रम की अवधि के अनुसार ही नामकरण होना चाहिए , जिस से नाम की समानता के कारण कोई भ्रम अथवा विसंगति उत्पन्न न हो।

समिति के अन्य सभी सदस्यों ने इस विषय में अपनी सहमति व्यक्त की।

**विषयक : एस.के.टी./बी.ओ.एस/9.8**

- परीक्षक सूची के अनुमोदन हेतु । (संलग्नक -6 )

**कार्य विवरण**

पाठ्य समिति के सभी सदस्यों ने मूल्यांकन हेतु विभागाध्यक्ष द्वारा उपस्थापित की गयी परीक्षक सूची का अनुमोदन कर दिया।

**विषयक : एस.के.टी./बी.ओ.एस/9.9**

अध्यक्ष की अनुमति से उपस्थापित कोई भी विषय जो कार्यसूची मे पूर्व निर्धारित नहीं है और पाठ्य समिति के अधिकार क्षेत्र मे है।

**कार्य विवरण**

कोई भी विषय प्रस्तुत नहीं किया गया।

अंत में अध्यक्ष के द्वारा बाह्य विषयविशेषज्ञों, कुलपति के द्वारा नामित सदस्यों एवं विभागीय सदस्यों का आभार प्रकट किया गया। इस आभार प्रदर्शन के साथ ही संस्कृत पाली एवं प्राकृत विभाग की पाठ्य समिति का नवम उपवेशन संपन्न हुआ।